**MS – 088**

# II Semester B.A./B.Sc./B.Sc. (FAD) Examination, May/June 2014
## (Freshers + Repeaters Scheme)
## (2011 – 12 and onwards)
## LANGUAGE SANSKRIT – II
## Champu Ramayanam – Balakanda, Grammar and Comprehension

Time : 3 Hours                                                                                    Max. Marks : 100

***Instructions:*** *1) Answer in* ***Sanskrit, Kannada*** *or in* ***English.***
*2) Questions* ***VI, VII*** *and* ***VIII*** *must be answered in* ***Sanskrit*** *only.*

I. **द्वयोः** उत्तराणि लिखत । **(2×12=24)**

ಯಾವುದಾದರೂ ಎರಡನ್ನು ಕುರಿತು ಉತ್ತರಿಸಿ.

Answer **any two** of the following.

1) चम्पूकाव्य नाम किम् ? प्रसिद्ध-चम्पूकाव्यानि अधिकृत्य प्रबन्धं लिखत ।
ಚಂಪೂ ಕಾವ್ಯ ಎಂದರೇನು ? ಪ್ರಸಿದ್ಧ ಚಂಪೂ ಕಾವ್ಯಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
What is a Champu-Kavya ? Write an essay on the famous Champu-Kavyas.

2) देवतागणेन कृतं महाविष्णुस्तुतिं निरूपयत ।
ದೇವತೆಗಳ ಗಣಗಳಿಂದ ಮಾಡಲ್ಪಟ್ಟ ಮಹಾವಿಷ್ಣುವಿನ ಪ್ರಶಂಸೆಯನ್ನು ನಿರೂಪಿಸಿ.
Describe the glory of Lord-Vishnu as praised by the group of Gods.

3) विश्वामित्रस्य मार्गदर्शने, रामलक्ष्मणयोः वनसञ्चारम् अधिकृत्य प्रबन्धं लिखत ।
ವಿಶ್ವಾಮಿತ್ರರ ಮಾರ್ಗದರ್ಶನದಲ್ಲಿ, ರಾಮಲಕ್ಷ್ಮಣರ ವನ-ಸಂಚಾರವನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write an essay on the journey of Rama and Lakshmana in the forest under the guidance of Vishwamitra.

II. **द्वयोः** श्लोकयोः भाषान्तरं कृत्वा भावार्थं विवृणुत । **(2×5=10)**

**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಭಾಷಾಂತರಿಸಿ, ಭಾವಾರ್ಥವನ್ನು ವಿವರಿಸಿ.

Translate and explain **any two** of the following verses.

1) गद्यानुबन्धरसमिश्रितपद्यसूक्ति
हृद्य हि वाद्यकलया कलितेव गीतिः ।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ।।

St. Claret College Library

P.T.O.

2) मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

3) नारायणाय नलिनायतलोचनाय

नामावशेषितमहाबलिवैभवाय ।

नानाचराचरविधायकजन्मदेश

नाभीपुटाय पुरुषाय नमः परस्मै ।।

4) एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः ।

लोकानन्दमुकुन्दस्य चत्वार इव बाहवः ।।

III. **एकस्य** गद्यभागस्य अनुवादं कुरुत । **(1×10=10)**

ಇವುಗಳಲ್ಲಿ **ಒಂದನ್ನು** ಅನುವಾದ ಮಾಡಿ.

Translate **any one** of the following.

1) अथास्मिन्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रयमाणे दशरथे सुमन्त्रः प्रहृष्टमना महर्षेरङ्गदेशसङ्गतावग्रहनिग्रहशौण्डस्य विभाण्डकसूनोरवश्यमृष्यश्रृङ्गस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास ।

2) भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम् ।

किन्तु सरसिजासनशासनमप्यमोघीकुर्वन् उर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नहमेव तं हनिष्यामिति व्याहृत्यान्तरधात् ।

IV. **त्रयाणां** वाक्यानां ससन्दर्भं विवृणुत । **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Explain with reference to context **any three** of the following sentences :

1) किं तर्पणं न विदधाति नरः पितृणाम् ?

2) मधुमयभणितीनां मार्गदर्शी महर्षिः ।

3) राजा चिरादवति रावणनामधेयः ।

4) बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत् ।

5) नियोगेन पितुः सोऽयं कौशिकमन्वगात् ।

V. **द्वयोः** लघुटिप्पणी लिखत। (2×4=8)

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ:

Write short notes on **any two** :

1) भोजराजः। 2) विश्वामित्रः।

3) पायसप्रदानम्। 4) ताटकावधम्।

VI. **संस्कृतभाषया** उत्तराणि लिखत।

ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ.

Answer in **Sanskrit.**

अ) **त्रयाणां** वाक्ये प्रयुज्यत। (3×1=3)

1) यत्र-तत्र 2) अस्ति

3) धिक् 4) सह

5) शक्यम्।

आ) **चतुर्णां** व्याकरणरीत्या पदपरिचयं कुरुत। (4×1=4)

1) परिगृह्य 2) गान्तुम्

3) मदीया 4) कृत्वा

5) ददर्श।

इ) **चतुर्णां** समासानाम् एकैकं उदाहरणं लिखत। (4×1=4)

1) पञ्चमीतत्पुरुषः 2) बहुव्रीहिसमासः

3) द्विगुः 4) द्वंद्वः

5) अव्ययीभावः।

ई) **पञ्चसु** वाक्येषु दोषान् परिहरत। (5×1=5)

1) अलं विवादः। 2) भवान् गच्छ।

3) रामं नमः। 4) एषः गङ्गानदी प्रवहति।

5) मित्रं समं गच्छामि। 6) विष्णुः वैकुण्ठे अधिवसति।

VII. **संस्कृतभाषायाम्** अनुवदत । **(1×5=5)**

ಮಿಥಿಲೆಯಲ್ಲಿ ಜನಕನೆಂಬ ರಾಜನಿದ್ದನು. ಸೀತೆಯು ಆತನ ಮಗಳಾಗಿದ್ದಳು ಆಕೆಯು ರೂಪವತಿಯೂ, ಗುಣವತಿಯೂ ಆಗಿದ್ದಳು. ಜನಕನು ಸೀತೆಯ ಸ್ವಯಂವರವನ್ನು ಘೋಷಿಸಿದನು. ವಿಶ್ವಾಮಿತ್ರರು ರಾಮಲಕ್ಷ್ಮಣರೊಂದಿಗೆ ಆ ಸಭೆಗೆ ಬಂದಿದ್ದರು. ಹಾಗೆಯೇ ಪ್ರಸಿದ್ಧ ರಾಜಕುಮಾರರು ಆಗಮಿಸಿದ್ದರು. ರಾಮನನ್ನು ಬಿಟ್ಟರೆ ಯಾರಿಗೂ ಶಿವಧನುಸ್ಸನ್ನು ಎತ್ತಲಾಗಲಿಲ್ಲ.

Janaka was the king of Mithila. Sita was his daughter. She was beautiful and virtuous. Janaka announced the 'Swayamvara' of Sita. Vishwamitra had come to that assembly along with Rama and Lakshmana, so also many prince. No one could lift Shiva's bow other than Rama.

VIII. **इमं** परिच्छेदं पठित्वा प्रश्नानामुत्तराणि लिखत । **(5×3=15)**

भारतस्य शिरस्थानभूते हिमालयपर्वते अनेकानि पुण्यक्षेत्राणि सन्ति । अस्याद्रेः शिखराणि अतीव तुङ्गानि सततं हिमाच्छादितानि च सन्ति । अतः एवायं 'हिमालयः' इति प्रसिद्धः । अत्र केदारक्षेत्रम् , बदरिक्षेत्रम्, हरिद्वारम्, ऋषिकेशादीनि पुण्यक्षेत्राणि सन्ति । गङ्गायमुना ब्रह्मपुत्राद्याः नद्यः अस्मात् उद्गम्य भारते प्रवहन्ति । अनेके यतयः, साधवः हिमालयस्याश्रमेषु तपस्यन्ति । अत्र विद्यमानेषु पुण्यक्षेत्रेषु मानसं सरः अन्यतमम् । इदम् हिमाद्रेः पश्चिमभागे टिबेटप्रदेशे सुशोभते । अस्य सरसः परिधिः द्विशतकिलोमिटर् इति वदन्ति । मानससरसि कृतं स्नानं पुण्यजनकमिति पुराणेषु उक्तम् । अत्र जलं मधुरं शद्धस्फटिकसदृशं नीलवर्णयुक्तं च भवति । अस्मिन् सरसि अनेके हंसपक्षिणः सदा विहरन्ति,अधिकानि सरोजानि रोहन्ति च ।

**प्रश्नाः**

1) हिमालयपर्वते कानि कानि पुण्यक्षेत्राणि सन्ति ?

2) काः नद्यः हिमालयात् उद्गम्य प्रवहन्ति ?

3) अनेके यतयः कुत्र तपस्यन्ति ?

4) मानसं सरः कुत्र विराजते ?

5) मानससरसः जलं कीदृशं भवति ?